*Distributed by* :
Indian Books Centre
40/5, Shakti Nagar
Delhi-110007

# SANSKRIT READER:

## WITH VOCABULARY AND NOTES

BY

CHARLES ROCKWELL LANMAN, A.B. AND LL.D. (YALE),

WALES PROFESSOR OF SANSKRIT AT HARVARD UNIVERSITY

HONORARY MEMBER OF THE ASIATIC SOCIETY OF BENGAL AND OF THE SOCIÉTÉ ASIATIQUE AND OF THE ROYAL ASIATIC SOCIETY OF GREAT BRITAIN AND IRELAND. CORRESPONDING MEMBER OF THE KÖNIGLICHE GESELLSCHAFT DER WISSENSCHAFTEN ZU GÖTTINGEN. FOREIGN MEMBER OF THE KÖNIGLICH BÖHMISCHE GESELLSCHAFT DER WISSENSCHAFTEN. VICE-PRESIDENT OF THE AMERICAN ORIENTAL SOCIETY

SRI SATGURU PUBLICATIONS
INDIA

*Published by* :
Sri Satguru Publications
Indological & Oriental Publishers
1st Floor, 40/5, Shakti Nagar
Delhi-110007 (India)

First Edition, Boston, 1906
Second Edition; Delhi 1983

Printed in India

*TO MY TEACHERS,*

WILLIAM DWIGHT WHITNEY
OF YALE COLLEGE,

ALBRECHT WEBER
OF THE UNIVERSITY OF BERLIN,

AND

RUDOLF ROTH
OF THE UNIVERSITY OF TÜBINGEN,

*IN TOKEN OF THANKS AND AFFECTION.*

वान् । अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात्प्रस्तावक्रमेण स पण्डितो ऽब्रवीत् ।

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥

तद्भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयामि । राजपुत्रैरुक्तम् । आर्य । कथ्यताम् । विष्णुशर्मोवाच । शृणुत यूयम् । संप्रति मित्रलाभः प्रस्तूयते ।

---

## III.

अहमेकदा दक्षिणारण्ये चरन्नपश्यम् । एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते । भो भोः पान्थाः । इदं सुवर्णकङ्कणं गृह्यताम् । तद्वचनमाकर्ण्य भयात्को ऽपि तत्पार्श्वं न भजते । ततो लोभाकृष्टेन केन चित्पान्थेनालोचितम् । भाग्येनैतत्संभवति । किं त्वस्मिन्नात्मसंदेहे प्रवृत्तिर्न विधेया । यतः ।

अनिष्टादिष्टलाभे ऽपि न गतिर्जायते शुभा ।
यत्रास्ति विषसंसर्गो ऽमृतं तदपि मृत्यवे ॥

किं तु सर्वत्रार्थार्जने प्रवृत्तिः संदेह एव । तथा चोक्तम् ।

न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥

तन्निरूपयामि तावत् । प्रकाशं ब्रूते । कुत्र तव कङ्कणम् । व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थो ऽवदत् । कथं मारात्मके त्वयि विश्वासः । व्याघ्र उवाच । शृणु रे पान्थ । प्रागेव यौ-



वनदशायामतिदुर्वृत्त आसम् । अनेकगोब्राह्मणमनुष्यवधान्मे पुत्रा अनेकशो मृता दाराश्च । सांप्रतं निर्वंशो ऽस्मि । ततः केनापि धार्मिकेणाहमुपदिष्टः । दानधर्ममाचरतु भवानिति । तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो दयावांश्च कथं न विश्वासभूमिः । उक्तं च ।

इज्याध्ययनदानानि तपः सत्यं क्षमा दमः ।
अलोभ इति मार्गो ऽयं धर्मस्याष्टविधः स्मृतः ॥
तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरश्च चतुर्वर्गो नामहात्मसु विद्यते ॥

मम चैतावाँल्लोभविरहो येन स्वहस्तगतमपि सुवर्णकङ्कणं यस्मै कस्मै चिद्दातुमिच्छामि । तथापि व्याघ्रो मानुषं खादतीति लोकप्रवादो दुर्निवारः । यतः ।

गतानुगतिको लोकः कुट्टनीमुपदेशिनीम् ।
प्रमाणयति नो धर्मे यथा गोघ्नमपि द्विजम् ॥

मया च धर्मशास्त्राण्यधीतानि । शृणु ।

मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा ।
दरिद्रे दीयते दानं सफलं पाण्डुनन्दन ॥
प्राणा यथात्मनो ऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः ॥

अपरं च । प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।
आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ॥

अन्यच्च । मातृवत्परदारांश्च परद्रव्याणि लोष्टवत् ।
आत्मवत्सर्वभूतानि यः पश्यति स पश्यति ॥

त्वं च दुर्गतः। तेन तत्तुभ्यं दातुं सयत्नो ऽहम्। तथा चोक्तम्।

दरिद्रान्भर कौन्तेय मा प्रयच्छेश्वरे धनम्।
व्याधितस्यौषधं पथ्यं नीरुजस्तु किमौषधैः॥

अन्यच्च। दातव्यमिति यद्दानं दीयते ऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥

तदत्र सरसि स्नात्वा सुवर्णकङ्कणमिदं प्रतिगृहाण। ततो जातविश्वासो यावदसौ सरः स्नातुं प्रविष्टस्तावदेव महापङ्के निमग्नः पलायितुमक्षमः। पङ्के पतितं दृष्ट्वा व्याघ्रो ऽवदत्। अहह। महापङ्के पतितो ऽसि। अतस्त्वामुत्थापयामि। इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थो ऽचिन्तयत्।

न धर्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः॥

किं च। अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया।
दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना॥

तन्न मया भद्रं कृतं यदत्र मारात्मके विश्वासः कृतः। तथा ह्युक्तम्। नखिनां च नदीनां च शृङ्गिणां शस्त्रपाणिनाम्।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च॥

अपरं च। सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः।
अतीत्य हि गुणान्सर्वान्स्वभावो मूर्ध्नि वर्तते॥

अन्यच्च। स हि गगणविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी।



विधुरपि विधियोगाद्ग्रस्यते राहुणासौ
लिखितमपि ललाटे प्रोज्झितुं कः समर्थः॥

इति चिन्तयन्नेव तेनासौ व्याघ्रेण व्यापादितः खादितश्च।

---

## IV.

अस्ति मगधदेशे चम्पकवती नामारण्यानी। तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन्पुष्टाङ्गः केन चित्सृगालेनावलोकितः। तं दृष्ट्वा सृगालो ऽचिन्तयत्। आः। कथमेतन्मांसं सुललितं भक्षयामि। भवतु। विश्वासं तावदुत्पादयामि। इत्यालोच्योपसृत्याब्रवीत्। मित्र। कुशलं ते। मृगेणोक्तम्। कस्त्वम्। जम्बुको ब्रूते। क्षुद्रबुद्धिनामा जम्बुको ऽहम्। अत्रारण्ये मित्रबन्धुहीनो मृतवदेकाकी निवसामि। इदानीं भवन्तं मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टो ऽस्मि। अधुना मया तवानुचरेण सर्वथा भवितव्यम्। मृगेणोक्तम्। एवमस्तु। ततो ऽस्तं गते सवितरि भगवति मरीचिमालिनि मृगस्य वासभूमिं प्रति मृगजम्बुकौ गतौ। तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति। तौ दृष्ट्वा काको ऽवदत्। सखे चित्राङ्ग। को ऽयं द्वितीयः। मृगो ब्रूते। जम्बुको ऽयमस्मत्सख्यमिच्छन्नागतः। काको ब्रूते। मित्र। अकस्मादागन्तुना सह विश्वासो नैव युक्तः। तन्न भद्रमाचरितम्। तथा चोक्तम्।

अज्ञातकुलशीलस्य वासो देयो न कस्य चित्।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः॥